**दिनाङ्क :- 25.01.2026**

**प्रात: - 06:55**

**प्रधानमन्त्री/'रोजगारमेला'**

**प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् भारतस्य व्यापार-पारगमन-सन्धिभिः अनेकैः देशैः सह भारतीययूनां कृते असङ्ख्यावसरा उद्घाटिताः भविष्यन्ति। प्रधानमन्त्री ह्यः नवदिल्ल्याम् आभासीय-तन्त्रमाध्यमेन अष्टादशं 'राष्ट्रियरोजगारमेले'ति वृत्तिमेलकं समबोधयत्। सः विभिन्नेषु शासकीय-विभागेषु संस्थासु च नवनियुक्तेभ्यः युवभ्यः एकषष्टि-सहस्राधिकानि नियुक्तिपत्राणि वितरितवान्। एतत् मेलकं देशे पञ्चचत्वारिंशत्-स्थानेषु आयोजितम्।**

**भारतस्य सुदृढाम् अर्थव्यवस्थाम् अभिलक्ष्य प्रधानमन्त्रिणा सबलं प्रतिपादितं यत् विश्वे एषा एव अर्थव्यवस्था या एक-दशकाभ्यन्तरे स्व-सकलोत्पादं द्विगुणम् अकरोत्। सः अवदत् यत् अद्यत्वे प्रत्यक्ष-वैदेशिक-निवेश-द्वारा भारते शताधिकाः देशाः निवेशं कुर्वन्ति।**

========================

**प्रधानमन्त्री/'मन की बात'-कार्यक्रमः**

**प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रातः एकादश-वादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् त्रिंशदधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-विभागस्य अन्तर्जालपटले www.newsonair.com इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शन-प्रधानमन्त्रिकार्यालय-सूचनाप्रसारण-कार्यालयानां यूट्यूब-वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात्-प्रसारणं भविष्यति। हिन्दीभाषायां प्रसारणस्य अनन्तरम् आकाशवाण्या अस्य प्रसारणं क्षेत्रीयासु भाषासु अपि भविष्यति।**

========================

**राष्ट्रपतिः/सम्बोधनम्**

**राष्ट्रपतिः द्रौपदीमुर्मूः सप्तसप्तति-तमस्य गणतन्त्र-दिवसस्य पूर्वसन्ध्यायाम् अद्य राष्ट्रं सम्बोधयिष्यति। सम्बोधनमिदम् आकाशवाणी-दूरदर्शनयोः सर्वासु वाहिनीषु हिन्द्यांग्ल-भाषयोः सायं सप्तवादनात् प्रसारयिष्यते। दूरदर्शनस्य सर्वाभिः वाहिनीभिः हिन्द्यांग्ल-भाषयोः सम्बोधनस्य प्रसारणानन्तरम् अस्य कार्यक्रमस्य प्रसारणं भविष्यति। आकाशवाणी रात्रौ सार्ध-नववादनात् अस्य क्षेत्रीय-भाषा-संस्करणस्य प्रसारणं करिष्यति।**

========================

**राष्ट्रिय-मतदातृ-दिवसः**

**निर्वाचनायोगेन अद्य षोडशः राष्ट्रिय-मतदातृ-दिवसः आमान्यते। नवदिल्ल्याम् अत्रावसरे अनेके कार्यक्रमाः आयोज्यन्ते। राष्ट्रपतिः द्रौपदीमुर्मूः अत्र कार्यक्रमे मुख्यातिथिः भविष्यति।**

**=========================**

**संस्कृत-साप्ताहिकी**

**प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे यथाकालं श्रोतुं प्रभवन्ति।**

**=========================**

**क्रिकेट्**

**भारत-न्यूजीलैंडयोः मध्ये अनुवर्तमानायां विंशतिं प्रतिविंशति-क्षेपचक्रीय-क्रिकेट्-स्पर्धा-मालिकायां गुवाहाट्याः बासपारायाम् अद्य तृतीया स्पर्धा आयोजयिष्यते। स्पर्धेयं सायं सप्तवादने आरप्स्यते।**

**अपरतः, 'वुमन्स्–प्रीमियर्–लीग्–क्रिकेट्'-स्पर्धा-मालिकायां गतरात्रौ बडोदरायाः बी.सी.ए.-क्रीडाङ्गणे डेल्ही-कैपिटल्स्-दलेन रॉयल्-चैलेंजर्स्-बेंगलूरु-दलं सप्तभिः क्रीडकैः पराजितम्।**

**।। इति वार्ता:।।**